**जीवत्तोका** स्त्री जीवत् तोकं यस्याः। जीवत्पुत्रिकायां स्त्रियां। (जेन्ना त् पोयाती) हेमच०।

**जीवत्पति** स्त्री जीवन् पतिर्यस्याः सपूर्वत्वात् वा न ङीपौ। सधवायां स्त्रियाम्। हेमच०।

**जीवत्पितृक** पु० जीवन् पिता यस्य कप्। विद्यमानपितृके जने। "अमास्नानं गयाश्राद्धं दक्षिणामुखभोजनम्। न जीवत्पितृकः कुर्य्यात् कृते तु पितृहा भवेत्" ति० त०। तत्र जीवत्पितृकस्य श्राद्धविशेषेऽधिकारः निर्णयसिन्धौ व्यवस्थापितो यथा।

"जीवत्पितृकस्य साग्नेरेव वृद्धिश्राद्धेऽधिकारः न तु निरग्नेः "न जीवत्पितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः। येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः। पितामहेऽप्येवमेव कुर्याज्जीवति साग्निकः। साग्निकोऽपि न कुर्वीत जीवति प्रपितामहे"इति चन्द्रिकायां सुमन्तूक्तेरित्याहुः प्रयोगपारिजातेऽप्यनाहिताग्निर्न कुर्यादितीदं व्याख्यातम् तन्न "अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्मणि। येभ्य एव पिता दद्यात्तानेवोद्दिश्य तर्पयेदिति" हारीतोक्तेः सौमन्तवन्तु वृद्धिश्राद्धभिन्नश्राद्धपरमित्युक्तं मदनरत्ने। श्राद्धपदं पिण्डपितृयज्ञपरमिति पृथ्वीचन्द्रोदयः। निर्णयामृते तु हारीतीयेऽनग्निकोऽनाहिताग्निरभिप्रेतः पूर्ववचने तु साग्निः श्रौताग्निः स्मार्त्ताग्निश्चोच्यते। तेनोभयाग्निहीनस्य नेत्युक्तं तन्न पूर्वोक्तदिशा गतिसम्भवेनाग्निपदस्य स्मार्त्ताग्निपरत्वे मानाभावात् वक्ष्यमाणनित्यानित्यसंयोगविरोधात् "पितरो जनकस्येज्या यावद्व्रतमनाहितम्। समाहितव्रतः पश्चात् स्वान् यजेत पितामहानिति, पृथ्वीचन्द्रोदये यमवचोविरोधाच्च। अपरार्केऽपि समावर्त्तने ब्रह्मचारी स्वयमेव नान्दीश्राद्धं कुर्यादित्याहुः अतः पूर्वमेव साधु वोपदेवोऽप्येवमाह। यत्तु मतं जीवत्पितृकस्य पुत्रनामकर्म्मादौ न वृद्धिश्राद्धम् हारीतीये जन्मादावित्यादिशब्देन तत्प्राप्तावपि "उद्वाहे पुत्रजनने पुत्रेष्ट्यां सौमिके मखे। तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुरिति" मैत्रपरिशिष्टे उद्वाह एव तस्योपसंहारात् एवं यत्र तु संस्कारादिपदं तदप्युद्वाहादिपरमेवेति तन्न उद्वाहपदस्य स्वविवाहपरत्वस्यापि सम्भवात् पुत्रविवाहपरत्वे मानाभावात् "नामकर्मणि बालानां चूडाकर्मादिके तथा" इत्यादिभिर्नित्यश्राद्धस्य चौलाद्यङ्गत्वावगतौ नित्यानित्यसंयोगविरोधाच्च अतो जन्मादाविति सर्वसंस्कारसंग्रहः।

तथा च कात्यायनः "स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु। पिण्डानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमात्"। सुतानां चौलादिसंस्कारेषु पिता स्वपितृभ्यः पिण्डान् श्राद्धम्। "पिण्डदोंऽशहरश्चैषामिति" दर्शनात् चोद्वहनाद्विवाहपर्यन्तं दद्यात् विवाहस्य प्रथमः "नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे बुधः। अत ऊर्द्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकमिति" स्मृतेः तस्य पितुरभावे तत्क्रमात् "असंस्कृतास्तु संस्कार्य्या भ्रातृभिः पूर्वसंस्कृतैरिति" यः कर्तृक्रमः तेन क्रमेण ज्येष्ठभ्रात्रादिर्दद्यादिति चन्द्रिकादयः। हेमाद्रिस्तु तस्य पितुरभावे यः पितृव्यमातुलादिः संस्कुर्यात् स तत्क्रमात् संस्कार्यपितृक्रमाद्दद्यान्नतु स्वपितृभ्य इति व्याचख्यौ। समावर्त्तनस्यापि विवाहप्राचीनसुतसंस्कारत्वात्पितैव नान्दीश्राद्धं कुर्यात् तदभावे ज्येष्ठभ्रात्रादिः तदभावे स्वयमेव कुर्यात्। उपनयनेन कर्म्माधिकारस्य जातत्वात् प्रथमाद्यविवाहेऽपीति पृथ्वीचन्द्रोदयचन्द्रिकादयः। मदनरत्नेऽप्येवम्। यदा तु पितरि संन्यस्ते प्रोषिते पतिते वा धर्म्मार्थं तत्पुत्रमन्यः संस्कुर्यात्तदा संस्कार्यपितुः पित्रादिभ्यो दद्यात् "पितरो जनकस्येज्या यावद्व्रतमनाहितम्। समाहितव्रतः पश्चात् स्वान् यजेत पितामहानिति" पृथ्वीचन्द्रोदये यमोक्तेः जीवत्पितृकस्य विशेषमाह कात्यायनः "वृद्धौ तीर्थे च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः" इति। तीर्थ इव प्रायश्चित्ताङ्गश्राद्धेऽपि तस्याधिकारः।

"पितरि जीवति यः श्राद्धं कुर्यात् स येषां पिता कुर्यात्तेषां कुर्यात्। पितरि पितामहे च जीवति येषां पितामहः कुर्यात् तेषां कुर्यात् त्रिषु जीवत्सु नैव कुर्यात्" विष्णु०स०। "जीवत्पितृकोऽपि" कात्या० श्रौ० सू०। पिण्डपितृयज्ञेऽधिक्रियते च। "जीवान्तर्हितेऽपि" कर्कसू०। "जीवपितृकस्य जीवेन पित्रादिना अन्तर्हितेऽपि व्यवहितेऽपि पितामहादेः पिण्डदानं भवति सोमादाविव "येभ्य एव पिता दद्यात्तेभ्यो दद्यात्तथा सुतः" इति कर्कस्मृतेः। "जीवपितृकस्य होमान्तमनारम्भो वा" सू०। "जीवपितृकस्य यजमानस्य होमान्तमेव पिण्डपितृयज्ञसंज्ञं कर्म भवति अथवाऽनारम्भ एव पिण्डपितृयज्ञस्य वाशब्दः पूर्वपक्षनिरासार्थः। अत्रानारम्भपक्ष एव युक्तः यतः पिण्डदानं प्रधानम्। तदभावे होमस्याङ्गभूतस्यानुष्ठानं न घटते। एवं जीवान्तर्हितेऽपीति पक्षं दूष-